गोपे जातिवाचकादन्तशब्दत्वेन ततः स्त्रियां ङीप्।

**अभीरु(लु)** त्रि० न०त०। १ भीरु(लु)भिन्ने युद्धादावुत्साहान्विते। "स्थाने युद्धे च कुशलानभीरूनविकारिणः" मनुः "ते वाशीमत इष्मिणो अभीरवः" ऋ०१,८७,६। २वटुकभैरवे पु० "अभीरुर्भैरवो भीरुर्भूतपोयोगिनीपतिः" वटुकस्तवः ७त०। युद्धस्थाने न०। शतमूल्यां स्त्री असङ्कुचितपत्रत्वात्तथात्वम्। वा जङ्। अभीरूः शतमूल्याम्। "अभीरुमिसिसिम्बूयवत्सकोशीरपद्मकैः" सुश्रुतः।

**अभीरुण** अभि+रु—बा०उनन् दीर्घः। १ अभिमुखे "यच्चाभिद्रुद्रोहान्टतं यच्च शेपे अभीरुणम्" श्रुतिः।

**अभीरुपत्री** स्त्री० न भीरूणि असंकुचितत्वात् पत्राण्यस्याः जातौ ङीप्। शतमूल्याम्। [२ तद्वति। त्रि०

**अभील** न० अभि+ईर—अच् रस्य लः। १ कष्टे २ भयानके

**अभीलाप** पु० अभि+लप—भावे घञ् दीर्घः। अभिमुखकथनरूपे शब्दे। "आलापाश्च प्रलापाश्चाभीलापलपश्च ये" अथ० ११,८,२५ लप् लपनं भावे क्विप् ततोद्वन्द्वः। तेन लपनालापप्रलापाभीलापाश्चत्वार इह उक्ताः। अभीलापलप् इति शब्दकल्पनं भ्रमविजृम्भितम्।

**अभीवर्ग** पु० अभि+वृज—आधारे घञ्। अभिमुखसंघे "अहं राष्ट्रस्याभीवर्गे निजोभूयासमुत्तमः" अथ०३,५,२०।

**अभीवर्त्त** पु०अभिवर्त्तन्ते गच्छन्ति स्वर्गमनेन अभि+वृत-करणे घञ्। १ब्रह्मसामनि तच्च "उदञ्चत्तोषाहमित्यस्यां योनावुत्पन्नं ब्राह्मणाच्छंसिनऋत्विग्भेदस्य पृष्ठ्यस्तोत्रम्। "अभीवर्त्तो ब्रह्मसाम भवति अभीवर्त्तेन वै देवाः स्वर्गं लोकमभ्यवर्त्तन्त यदभ्यवर्त्तन्त तदभीवर्त्तो ब्रह्मसाम भवति स्वर्गस्य लोकस्याभिवृत्त्यै" ता०ब्रा०। "अभिवृत्तिसाधनत्वादस्य साम्नोऽभीवर्त्तसंज्ञा निष्पन्ना" भा०। "तदभीवर्त्तस्याभीवर्त्तत्वमिति सांख्यायनसू०। एतदभीवर्त्ताख्यं साम पूर्व्वस्मिन् पञ्चसि विद्यमानानामाभिप्लविकानामह्नां स्वरसाम्नां च माध्यन्दिने सवने यजमानान्वारब्धेन ब्रह्मणा पृष्ठस्तोत्रतया कर्त्तव्यं, तथा उत्तरस्मिन् पञ्चसि "इन्द्रक्रतुन्न आभरे" त्येक एव प्रगाथः ब्रह्मसामाश्रयः कर्त्तव्यः। प्रत्यहं च तस्मिन् प्रगाथे अन्यदन्यत्साम ब्रह्मणा पृष्ठ्यस्तोत्रार्थं कर्त्तव्यम् इति" ता०ब्रा० भा०। २ संवत्सरे। "अभीवर्त्तः सविंशः" यजु० १४,२३। अभिवर्त्त्यते आवर्त्त्यते इत्यभीवर्त्तः सामाभिवृत्तिरूपः स विंशः स्तोमः यद्वा अभिवर्त्तयत्यावर्त्तयति सर्व्वाणि भूतानीत्यभीवर्त्तः संवत्सरः "उपसर्गस्य घञ्यमनुष्ये बहुलमिति" पा० दीर्घः। द्वादशमासरूपर्त्तुसंवत्सररूपविंशतिसङ्ख्यया सहितः सविंशः। य एष सविंशस्तोमः तमुपदधातीत्यर्थः "संवत्सरो वा अभीवर्त्तः इति संवत्सरो हि सर्वाणि भूतान्यभिवर्त्तते" श्रुतिः वे०दी०। ३अभीवर्त्तेनेत्यादिके सूक्ते "अथैनं सारवमाणमुपारुह्याभीवर्तं वाचयति" आश्व० गृ०। ४ अभिवृत्तिसाधने हविर्भेदे च। "अभीवर्त्तेन हविषा येनेन्द्रो अभिवावृते" ऋ० १०,१७४,१।

**अभीशु** पु० अभि+अश—उन् पृ० अत इत्त्वम्। १ बाहौ "अभीशवोऽभ्यश्नुवते कर्म्माणि" निरु०। २ अश्वरज्जौ। "स्थिरा वसन्तु नेयोरथो अश्वा स एषां सुसंस्कृता अभीशवः" ऋ० १,१३८,१२,। ३ किरणे "प्रफुल्लतापिञ्छनिभैरभीशुभिः" माघः "सुयन्तुभिः सर्वशासैरभीशुभिः" ऋ० ५,४४,४, अभीशुभिः रश्मिभिः" भा०। ४ "अङ्गुलौ च अभीशवोऽङ्गुलयः" ऋ० भा० उक्तेः।

**अभीशुमत्** पु० अभीशवः किरणा बाहुल्येन सन्त्यस्य मतुप्। सूर्य्ये "त्विषिपःत्विषुरभीशुमानिव" माघः।

**अभीषङ्ग** पु० अभि+सनुज—घञ् दीर्घः। अभिषङ्गशब्दार्थे।

**अभीषु** पु० अभि+इष+कु। १ किरणे (लागाम) इति ख्याते २प्रग्रहे, ३ कामे, ४ अनुरागे च। सर्वे कोषकारा मूर्द्धन्यान्ततया पेठुः लोकवेदयोस्तु तालव्यान्तप्रयोगः" मल्लि०।

**अभीष्ट** त्रि० अभि+इष—क्त। १ वाञ्छिते, २ दयिते, ३ हृद्ये च "स्नातकं गुरुमभीष्टमृत्विजम्" माघः। "आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये" वे०सा०।

**अभुक्त** त्रि० भुज—कर्म्मणि क्त न०त०। १ "अभक्षिते अन्नादौ २अकृतभोगे पुण्यादौ च। "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि" पुरा०। भोगश्च भोजनीयद्रव्याहारः कर्म्मकृतसुखदुःखानुभवश्च॥ भुक्तं भोजनं भावे क्त अर्शा० अच् न०त०। ३ भुक्तवद्भिन्ने "भुक्ता ब्राह्मणाः पीता गाव इति अर्श आद्यच" पा०भाष्यम्। मुग्धबोधे तु कर्त्तरि क्त इत्युक्तम्। "अभुक्तौ ह्यतिथिर्व्रजन्" स्मृतिः "अभुक्तस्य दिवा निद्रा पाषाणमपि जीर्य्यति" वैद्य०।

**अभुक्तमूल** न० "भुजङ्गपौरन्दरपौष्णभानां तदग्रभानाञ्च यदन्तरालम्। अभुक्तमूलं प्रहरप्रमाणं त्यजेत् सुतं तत्रभवां सुताञ्च" इति नार०। "ज्येष्ठान्ते घटिके द्वे च मूलाद्यघटिकाद्वयम्। अभुक्तमूलमित्याहुर्ज्जातं तत्र विवर्ज्जयेत्" वशि० ज्येष्ठान्त्यघटिकार्द्धञ्च मूलादौ घटिकार्द्धकम्। तयोरन्तर्गता नाड़ी ह्यभुक्तमूलमुच्यते" इति बृह०प०। उक्ते ज्येष्ठामूलानक्षत्रयोराद्यन्तघटिकाविशेषे।